॥ श्रीः ॥

जयपुरराजसभाप्रधानपण्डित- महामहोपदेशक-
समीक्षाचक्रवर्त्ति- विद्यावाचस्पति-
श्रीमधुसूदनशर्म्म-मैथिल-
विरचिते

ब्रह्मविज्ञानशास्त्रे

सप्त ग्रन्थाः -

[1] दिव्यविभूतिः॥ [2] उक्थवैराजिकम्॥ [3] आर्य्यहृदय-
सर्वस्वम्॥ [4] निगमबोधः॥ [5] विज्ञानप्रवे-
शिका॥ [6] विज्ञानमधुसूदनः॥
[7] सांख्यसप्रदीपः।

तत्र तावद्

विज्ञानमधुसूदनस्य पञ्चसु ग्रन्थेषु

पञ्चमीयं -

ब्रह्मचतुष्पदी

विज्ञानमधुसूदन ग्रन्थे पञ्च प्रकरण ग्रन्थाः -

1 प्रथमो ग्रन्थः..... निर्विशेषोपदेशः..... ब्रह्मविनयः.....१६ बलानि
2 द्वितीयो ग्रन्थः..... अमृतोपदेशः..... ब्रह्मसमन्वयः.. ३ पुरुषाः
3 तृतीयो ग्रन्थः..... ब्रह्मोपदेशः..... ब्रह्म प्राजापत्यम् ५ प्रकृतयः
4 चतुर्थो ग्रन्थः..... शुक्रोपदेशः..... ब्रह्मोपपत्तिः... ६ शुक्राणि
5 पञ्चमो ग्रन्थः..... पुरोपदेशः..... ब्रह्मचतुष्पदी · पुराणि

वेद सहस्रम्

वेदस्वरूपम् ।

अधिकरणानां भेदात् प्रत्यधिकरणानि सन्ति भिन्नानि ।

वेदो मनसि, प्राणे यज्ञो, वाचि प्रजाः श्रोताः ॥ १ ॥

वेदाः स्वरूपं त्रिभिरस्य वेदैः, प्रजापते जीवनमस्ति यज्ञः ।

कर्मास्य नित्यं जननं प्रजानां प्रति प्रजापत्य वधेयमित्यम् २

	प्रजापतेः	
१	स्वरूपम् वेदः	मनसि
२	जीवनम् यज्ञः	प्राणे
३	कर्म प्रजाः	वाचि

मूर्तौ च मूर्तेश्च महिम्नि वेदास्त्रयः समन्तात् प्रथिता स्तथाहि ।

ऋङ् मूर्तिरेतस्य शिरस्तु सामोदरं यजुः प्राह कहोड इत्यम् ॥ ३ ॥

यजुरुदरः सामशिरा असावृङ्मूर्तिरव्ययः ॥ स ब्रह्मेति स विज्ञेय ऋषिर्ब्रह्ममयो महान्" (कौ. उ. १ निघा)

वेदस्य ऋक्साम यजूंषि भेदा वेदास्त एते प्रथिता स्त्रयोऽपि ।

१ अव्ययोऽमृतात्मा
२ ब्रह्म भोक्तात्मा
३ महान् सत्वात्मा

वेद प्रभेदा स्त्रिविधा रसश्च छन्दो वितानश्च पृथक् त ऊह्याः ॥ ४ ॥

छन्दांसि सर्वत्र ऋचः स्यु रेवं सर्वत्र सामानि बहिर्वितानाः ॥

१ ऋग्वेदः - छन्दः
२ सामवेदः - वितानः
३ यजुर्वेदः - रसः

छन्दांसि येषां परितो वितानास्तेऽमी रसा एव यजूंषि सन्ति ॥ ५ ॥

रस वेदाः

१ अग्निर्महोक्थं च महाव्रतं च त्रयो रसाख्या इह सन्ति वेदाः ।

महाव्रतं साम महोक्थमृक् स्या दग्निर्यजुः स्यादिति ते पृथक् स्युः ॥

रस वेदाः		
१ महोक्थम्	मण्डलम्	ऋक्
२ महाव्रतम्	अर्चिः	साम
३ अग्निः	पुरुषः	यजुः

यमत्र पश्यामि स नूनमग्निः (१ यजुः) ॥ सस्त्रं सते तस्य रसोऽग्रमागात् ।

एतन्महोक्थं (२ ऋक्) ॥ यदमुष्य देवाः स्त्रस्तस्य पूर्त्यै नु महाव्रतं तत् (३ साम) ॥ ७ ॥

अग्निरेव त्रयो वेदाः

२ (१) कृत्स्नोयमग्निः पुरुषोऽस्ति तद्यजुर्यश्चीयते यश्च चित्ते निचीयते ।

अग्निपरीक्षा

(२) आदित्य एवाग्निरयं स उत्तमोऽस्त्यस्मीयतो मध्यम पार्थिवाविमौ ॥ ८ ॥

संवत्सरो वायुरयं च देवताः सूर्य्यादि भवन्तीति वदन्ति केचन ।

(३) यज्जूर्यजुर्वायुरिहाग्निरस्त्यसावित्यं तु शाकायनिनः प्रचक्षते ॥ ९ ॥

श्रौमतस एवं मनुते तथा वा हालिङ्गवः प्राह च वायुमेव ।

यत्रोत्तमं कर्म करोत्यथायं तं वायुमेवाप्य यते हि यस्मा ॥ १० ॥

इमे [illegible] प्रथमं प्रतिष्ठा वीर्यमजायत - ब्रह्म । ततो भूयांस्यमृतमसुमयानि रूपाण्युपतिष्ठत तस्मात् तदुक्थम् । उत्थिते [illegible] इदं साम्येन बिभर्ति तस्मात् तत्साम ॥ उत्थितानि चैतानि सर्वाणि रूपाण्यात्मनि बिभर्तीति तद् ब्रह्म ॥ [illegible] ॥ [illegible] ब्रह्मासीत् - तदृतम् । ततो यजुः श्रीलाभवत् - तत् सत्यम् ॥ उक्थं साम ब्रह्मेति रूपत्रयमेक आत्मा ॥ स उभयरूप[illegible] [illegible] सत्यमभवत् ॥ ऋतं सोमः । सत्यमग्निः ॥ अग्निवेदं यजुर्ब्रह्म द्वेधा रूपाण्यधत्त - यच्च जूश्च । तावेतौ पुनरन्या [illegible] गतिस्थितिलक्षणौ आख्याकाशौ ॥ [illegible] एष सोममयो यजुर्नामाग्निः स्थिरं रूपं धत्ते - आवपनम् - अन्नादः - अन्न[illegible] । तदिदं ब्रह्म - अमृत - अक्षरं - क्षरं चेत्याम्नायते । तदित्थं त्रेधा विभक्तमिदं यजुर्ब्रह्मैव पुरुषोऽग्निः ॥ अग्निमावपने [illegible] [illegible] सरस्वत् विकुर्वन्ननेकविधानि रूपाणि सृजति । तत्तद्रूपं सृष्ट्वा सर्वत्रानुप्रविशति ॥ तान्येतानि पञ्च रूपाणि सम्पन्ने - [illegible] - आपः - वाक् - अन्नम् - अन्नाद इति । प्रकृतयो हीमानि पञ्च ब्रह्माणि ॥ " तेषु पञ्चाक्षराण्यभिहितानि ॥

२) (४) संवत्सरं त्वाह तमेतमग्निं शाट्यायनिः सन्त्यृतवो विभागाः।
मस्मिंस्तमेवेच्छति याज्ञवल्क्य स्तदग्नितः सर्व विधास्ति सृष्टिः॥

३ प्रजापतिर्योऽस्ति ततोऽस्य मध्यात् प्राणः समुत्क्राम्यति वाङ् मनश्च।
अग्निः स सोमः सह सर्व देवैः स्वास्थ्याय तत्रैत्यभिसृज्यतीमम्॥
प्रजापतेरस्य शरीर तोये रसाः समुत्थाय गतादि गन्तम्।
महान्त उत्थास्त इमे समन्तादतो महोक्थानि वदन्ति तानि॥
यतोऽयमग्निः प्रातितिष्ठतीह प्रजापतिस्तेन मतोऽयमग्निः।
प्रतिष्ठितः सोऽस्ति रसो यजुस्तत् पुनःक्रमादुत्क्रमते तदर्कः स्यात्
उत्क्रान्त वीर्य्यस्य पुनर्भृतः स्यात् प्रपूरणं तद्धि महाव्रतं स्यात्
यज्ञेऽस्ति यो दीक्षित एष भुङ्क्ते यत् तद् व्रतं नाम तदित्यमेतत्॥

\# प्रस्ताव नानात्व मुदीर्य्य साम्नः समान मे तन्निधनं यदाहुः।
दिग्भ्यो रसानां तदिहैक बिन्दो स्वर्ज्योतिषि प्राप्ति रियं प्रतिष्ठा॥
प्राणाहि सामान्य मृतं तदग्नौ देवा हि रूपं न्यदधु स्तथाहि।
धामं प्रियं संस्मरतां सुराणां संहन्यमाना स्तनवो हि साम॥
ऋक् सामयो रिन्द्र हरित्व मुक्तं ताभ्यां च रत्यूर्ध्वमध स्तथायम्।
ते सोमपाने तत एव सोमं पिबत्यनुक्रम्य चरन् स इन्द्रः॥
ऋक् सामयोरत्र यजुःष्वपीति र्यजुस्तदाश्रित्य हिते भवेताम्।
उत्पद्यते यत्र यजुर्नवीनं तत्रर्क् च सामापि नवे भवेताम्॥
"अग्निर्जागार तमृचः कामयन्ते अग्निर्जागार तमु सामानि यन्ति।
अग्निर्जागार तमयं सोम आह, तवाहमस्मि सख्ये न्योकाः॥"
वेदे त्रयी वागियमस्ति तत्र प्राणः स वाचैव तया त्रिलोकीम्।
उत्पादयन् विक्रमते त्रिधाऽसौ त्रिविक्रमो विष्णुरतः स यज्ञः॥
दिवं महोक्थेन महाव्रतेनान्तरिक्ष माप्नोदि ममग्निरग्नि च।
पृथ्वी चितोऽग्निर्मह दुक्थ मस्ति द्यौरन्तरिक्षान्तु महाव्रतं स्यात्॥

---

२) वायुरन्तापतनः, संवत्सरः सापतन इत्यनमोऽर्यदः।

\#\# तानि वै नानाप्रस्तावानि समाननिधनानि। तानि यन्नाना प्रस्तावानि नानाह्यपश्यन्।।
अथ यत् समाननिधनानि। एको ह्येव यस्तस्य प्रतिष्ठा, एकविंशः स्वर्गो लोकः।
तस्मात् स्वर्ज्योति निधनानि। शत॰ कां ८ प्र॰ ४। ब्रा॰ ५। कं॰ ६।

यावन्महोक्थं स ऋचां समुद्रो महाव्रतं साम समुद्र एषः।
अग्निस्त्वमीषां यजुषां समुद्रस्त्रयः समुद्रा इह देवलोकाः॥
सूर्य्यस्त्रयीं तावदुहैदोरामो यन्मण्डलं भाति महत्तदुक्थम्।
२) यद्दीप्यतेऽर्चिस्तु महाव्रतं तद्यन्मण्डलेऽस्मिन् पुरुषोऽस्ति सोऽग्निः॥
~~यो मौलिकोऽर्चो नीरूपत्वाददृश्यः तदमृतं तन्महाव्रतं तत्साम।~~

॥

त्रय्येव विद्या तपतीयमेषा सौ मण्डलेऽस्मिन् पुरुषः स मृत्युः।
यद्दीप्यतेऽर्चिस्त्वदमृतं तदस्मा देवामृतान्मृत्यु मृतिर्न भाति॥
तदर्चिषस्तत्पुरुषस्य चैत द्यन्मण्डलं सा भवति प्रतिष्ठा।
उक्थे महत्येव महाव्रतं स्यादग्निश्च सर्वत्र तथैव विद्यात्॥
अग्निर्द्विधास्त्या हवनीय एकः प्राणश्चितेऽग्नौ स निधीयतेऽग्निः।
यश्चीयतेऽग्निः स हि वाग् यजुर्यत् स पूरुषोऽस्मिन् पुरुषाश्च सप्त॥
चत्वार आत्मा पुरुषा अथ द्वौ पक्षावथैकः पुरुषोऽस्ति पुच्छम्।
तैः सप्तभिर्यः पुरुषः स एकः प्रजापतिः श्रीभिरमुख्य शीर्षम्॥

वितान वेदाः

प्रजापतौ त्रित्ववशात् त्रयोऽन्ताः स्युर्नाभि बिन्दुस्त्वथ मूर्त्ति पृष्ठम्।
तथा बहिः पृष्ठमिति त्रयोऽपी तरे तरेण ग्रथिताः स्युरेते॥
नायाम विस्तार मयः प्रदेशो यस्यास्ति बिन्दुर्ध्रियते स नाभौ।
सा वस्तु भारस्य तुलास्ति तस्मिन् स्थिते स्थितं वस्तु गते गतं स्यात्॥
हस्तेऽस्य वस्तु स्पृशतो यतः स्याद् बाह्यन्यमाना गति रुल्बणं यत्।
तन्मूर्ति पृष्ठं बहिरस्य पृष्ठं दृष्टि र्यतो वाक् क्रमतेऽथनो ध्वनिः॥

---

२) यो मौलिकोऽर्चो नीरूपत्वाददृश्यः तदमृतं तन्महाव्रतं तत्साम। यो यौगिकोऽर्चो मण्डलं संपद्यते तद्यौगिकत्वादेव प्रत्यर्चं परिवर्तनशीलमपि प्रत्यर्चं नियतत्वादमृतमृत्युः। तन्महदुक्थम्। यस्तु मण्डले पुरुषः स प्रतिक्षणमन्यान्यचक्रवान् तस्मान्मृत्युः। तद्यजुः॥ ·। ·। ·।

तन्नाभिविन्दोरिह बाह्य पृष्ठे सूत्राणि षष्टि त्रिशतीमितानि ।
ततोऽश साम्यं विषमेऽपि पृष्ठे बाह्येऽन्तरे मूर्त इति प्रतीमः ॥

१ प्रवाक् ततं पृष्ठ मृगुत्तरं तु वितानितं साम समांश पृष्ठम् ।
२) ऋच्ये वचा ध्यूढमिदं हि साम ऋक् साम भिन्नास्त्विह वाग्यजुः स्यात् ।
तान्यत्र पृष्ठानि च तानि सूत्राण्येवं वितानो भवतीह येषाम् ।
प्राणांश्च वाचश्च मनांसि तानीतरेतरेण ग्रथितानि विद्यात् ॥
विन्दुस्य शक्त्या स्तननेन मूर्तिर्मूर्ते रसानां तु वितानतोऽस्ति ।
पृष्ठं हि स्तत्र न वस्तु भारः किन्त्वस्य रूपं च रसोऽत्र भाति ॥

छन्दो वेदाः ।

प्रजापतिः प्राण मनो वचो मयो भवत्यणुस्कन्ध विभेदतो द्विधा ।
स्वभावतः स द्विविधोऽपि विग्रहं धत्ते महिम्नान्वितमेव नित्यदा ॥
रवेरिवोद्गत्य पुरश्च पश्चादवागुदक् चोर्ध्व मधश्च नाभेः ।
सर्वा दिशो मण्डलयन्त उस्रा आवृण्वते तान्महिमस्वरूपम् ॥
स्कन्धस्य यावानणुभिः सहस्रैर्व्यासस्तदन्ताण भुवोर्महिम्नो ।
यत्रैक्य मुत्पद्यत एतदन्तः स्कन्धस्य रूपं महिमा बिभर्ति ॥
रसोऽग्र मणादिति पूर्वमुक्तं नाभौ न तस्यैतिस पूर्वनभ्यः ।
पार्श्वाणु तिर्यगुमहिम्नैक्य सिद्धाणुः स्थान मे तद् भजते तथोऽर्ध्वम् ॥
कूटस्थित व्यास भुवा मणूना मित्यं महिम्ना स्तु स युजां यदेकम् ।
स उत्तरस्याशस्य नाभिः संपद्यते तद्वदिहोत्तरेषाम् ॥
पूर्वस्य पूर्वस्य तु नभ्य आत्मा न ह्युत्तरस्मिन् क्रमते तदित्थम् ।
व्यासो ह्रसत्युत्तरमुत्तरं स क्रमात् प्रति व्यासमयं क्रमः स्यात् ॥

---

२) ऋचोऽस्य मण्डलं सामान्यस्य मूर्तिर्यजूंषि चोति - सूर्यसिद्धान्ते मूर्ते - यजुर्मुक्तं तच्छ्रुतिविरुद्धम् ।

पृष्ठेऽणवः सन्तिहि यावदेते द्वौ द्वौ विदिक्स्थौ भवतस्तु तेषाम्।
व्यासो दयोता ननु सृत्य सर्वे व्यासाः प्रकल्प्याः प्रतिमूर्ति भेदात्॥
समान दिक्स्थाणु कृतास्तु रेखा बह्व्योऽत्र पश्चाच्च लितास्तदैक्यम्।
प्रायान्त्यतो वर्तुल वृत्त पृष्ठाम् रेखाः समव्यासत एव वीक्ष्ये॥
व्यासान्त बिन्द्वोः प्रति मूर्ति पृष्ठ स्थयो रिह च्छन्द इतीय माख्या।
तच्छन्दितं वस्तु तदन्तरस्ति च्छन्दः कृतं बन्धन मेव ऋक्त्वम्॥
व्यासान्त बिन्द्वो र्यदि संनिपातात् स्यान्नभ्य बिन्दुः परतस्तु ताभ्याम्।
न चाणवः सन्ति ततोऽस्य नास्ति व्यासस्तत स्तत्र क्रिया समाप्तिः॥
व्यासान्त बिन्द्वो रवसान बिन्द्वा रस्मि रसानुक्रमशो गतः स्तः।
व्यासान्तरे खे हि तत त्रिकोण स्ततो प्रपन्नाः प्रति मूर्तयः स्युः॥ ३
पृष्ठे दृगाल्मा अणु वस्तु यावत् पृष्ठास्तु तावत् त्रिभुजान्तरस्थाः।
क्षेत्राणि सन्ति त्रिभुजानि तावन् महोक्थमूर्ति व्रज संचितानि॥
छन्दोऽभिधे बिन्दुभि रात्त रूपयोर्या व्यास रेखाः परिपार्श्व रेखयोः।
अन्तः स्थिता हृस्व परार्धृचो हितायजूंषि मूर्तिस्त्वमृतान् रसान् विदुः॥
मूर्तेः सामान्तरतः समन्ततः समान मात्राः प्रति मूर्तयः स्थिताः।
अतः समानान्तर कॢप्त रेखया यत्कल्प्यते पृष्ठमिहास्ति साम तत्॥
पृष्ठानि तावद्विषमाणि सर्वाण्यविर्भवन्तीह तथापि तेषाम्।
पूर्वस्य पृष्ठस्य परत्र पृष्ठे विभाग साम्यं तदपीह साम॥
मूर्ते र्महिम्नि प्रसृतौ प्रसारा द्रुस्वौ भवन्त्यः प्रतिमूर्तयोर्याः।
सर्वा ऋचस्ता अथ स प्रसारः संतिष्ठते यत्र तदन्त साम॥
ऋचां समानां परितः स्तुतानां पृष्ठानि सामानि बहूनि सन्ति।
तदन्त सामास्ति यतो बहिर्धा नर्चो प्रचारोऽस्त्यभिधीयते तत्॥

॥

भूयास पिन्द्रोर्विलयेन नभ्ये बिन्दौऽपि ना व्यासमणुः स एकः ।
चतुर्द्दिशं यत्र विभाति देशे रथन्तरंपृष्ठमिदं वदन्ति ॥
सूर्यस्य बिम्बोऽपि तथा प्रदेशे यत्रेक्षितो भाति भवत् स्वणीयान् ।
तदस्ति पृष्ठं बृहदस्य यस्मात् पृथिव्यपेक्षं तु बृहत्वमस्ति ॥
रथन्तरं तावदिदं त्रिभेदं रथन्तरं वाङ्मय मे तदूर्ध्वम् ।
वैरूपकं गोमयमे तदूर्ध्वं स्याच्छाक्करं तद् द्युमयं पृथिव्याः ॥
बृहत् तथा स्यात् त्रिविधं बृहद् प्राग् ज्योतिर्मयं गोमूमस्ति तूर्ध्वम् ।
वैराजमस्मादपि चोर्ध्वमायुर्मयं मतं रैवतमें तदूह्यम् ॥
अग्निस्तु भावां स्तदिदं रथन्तरं पर्जन्य क्लृप्तं तु विरूप साम तत् ।
लोकास्त्रयो दिक् सहितास्तु शाक्करं ताण्ड्य श्रुताविल्य वदन्महर्षयः ॥
आदित्यतः साम बृहन्नि रूपितं, प्रोतं तु वैराज मृतुष्वनन्तरम् ।
प्रोतं पशुष्वस्य च साम रैवतं ताण्ड्य श्रुताविल्य वदन् महर्षयः ॥
एकैक मेषांतु रथन्तराणा मेकैक मन्येष्वति मन्य मैतत् ।
इत्थं परेषामपि पृष्ठ मूह्यं यत्पृष्ठ मस्यास्ति तदस्त साम ॥
यदग्नि क्लृप्तं स पृषाथ योश्रा सौम्यं ततोर्यन्मिथुनं क्वचित् स्यात् ।
तत्रोदितं साम तु वामदेव्यं प्राणेषु गायत्रमिदं पृथक् स्यात् ॥
अङ्गाङ्गिनोः प्रोतमिदं तु यज्ञा यज्ञीय साम प्रवदन्ति विज्ञाः ।
यद्दैवतं साम तु राजनं तत् तदित्य मन्यत्र पृथक् तदूह्यम् ॥
रथन्तरं भूर्बृहदस्ति तु द्यौ गायत्रमग्निः खलु वामदेव्यम् ।
प्राणः स वायुश्च शशी तु यज्ञा यज्ञीयमित्याहतु याज्ञवल्क्याः ॥
यज्ञ प्रयोगे तु यदस्ति सामोद्गानं तदर्थं नियतास्तु मन्त्राः ।
साम्नाममीषां स्वरवर्णयुक्ता निदर्शिताः साम विधान शास्त्रे ॥

यत्तु श्रुयुस्तेज आयाति निम्नात् तारादीनां भूयसा नेह सेह।
मन्ये भ्रान्तं तन्नितान्तं न कान्तं सामान्तं तत् तेज एकान्ततः स्यात्॥
श्रुत्याः श्रौतं तेजसः साम रूपं "सर्वं तेजः साम रूपं ह शश्वत्"।
तं दृष्टान्तं भावयेद् यादृशं तत् तेजो रूपं तादृशं साम विद्यात्॥ (
ऋचश्च सामेत्युप लक्षणं स्यात् ऋचोऽपि सामत्व मुवाच सूर्या।
प्रस्ताव पूर्वा निधनावसानाः सामांशका ऋच्यपि संभवन्ति॥

"ऋक् सामाभ्यामभिहितौ गावौ ते सामनावितः।
श्रोत्रं ते चक्रे आस्तां दिवि पन्था श्च राचरः॥
(ऋ॰ सं॰ मं॰ १० सू॰ ८५)

साम भक्तयः।

प्रजापते मूर्ति मतः स्वरूपे प्रदर्शिता सौम विशेष संस्था।
अथोपचारे त्वधुना विशेषात् साम्नः स्वरूपं प्रतिपादयामः॥
गीन्यत्र नामानि तु तान्यृचः स्युः रूपाणि यान्यत्र यजूंषि तानि।
कर्म्माणि सामानि तदस्ति कर्म्म प्रत्यर्थतः सप्तविधं तथाहि॥
हिंकारतः प्रस्तुति रादिरस्योद्गीथः प्रतीहार उपद्रवोऽन्तः।
एता अवस्था उपचार रूपा भवन्ति ताः सामविधाः प्रतीयात्॥
नोदोऽग्नितः प्रक्रमणं च वायोः स्थाने च योगः करणस्य वाचि।
सा हिंकृतिः प्रस्तुति रादिरस्योद्गीथो यदुच्चार्यते बहिर्धा॥
इत्युत्थितायाः प्रतिदिक्त्वमस्याः शान्त्यै प्रतीहार उपद्रवस्तु।
रूपे विकारो निधनं विनाशो यथात्र वाच्येव मिवेतरत्र॥

40 मनो अस्या अन आसीद् द्यौरासीदुत च्छदिः। शुक्रावनड्वाहावास्तां यदयात् सूर्या गृहम्। १०।८५।१०
शुचीते चक्रे यात्या व्यानो अक्ष आहतः। अनो मनस्मयं सूर्या ऽऽरोहत् प्रयती पतिम्। १०।८५।१२

पुरोदयाद् यः प्रथमो द्वितीयो यः संगवे मध्यदिने तथाऽयः।
मध्याह्न पश्चाद् पराह्न पश्चाद् सायं प्रतापे तु रवेस्तदूह्यम् ॥
अथापि वा पञ्चविधं प्रतीयान्नादिर्न चोपद्रव एष भिन्नः।
न हिंकृतिर्न प्रतिहार इत्थं दृष्टौ तु साम्नि विभक्तिमन्यो ॥
व्यासस्य यो सावसान बिन्दुः प्रस्ताव एषोऽस्त्यथ गर्भबिन्दुः।
तस्यास्ति साम्नो निधनं तदित्थं मूर्ताविमाः सामविधा प्रतीयात्
प्रस्ताव भक्तिर्यदृशी वास्ति पूर्व्या सामेव पश्चान्निधनाख्यभक्तिः।
ऋक् सामयो र्योगि उपैति यस्मिन् मध्ये स उद्गीथ इवास्ति पूर्णः॥
उत्पद्यते तिष्ठति गीर्य्यते च क्रिया तदुत्पत्ति निगीर्ण मध्ये।
या स्याः स्थितिस्तामुपलक्ष्य कर्म्मोद्गीथं विदुस्तद्धि समस्तमेतत् ॥

वेद साधारणम्

सर्वेऽपि यज्ञा रसवेदतः स्युर्यज्ञादिहान्नान्नभुजोः प्रवृत्तिः।
स्वास्थ्यं क्षयो वृद्धि रिहान्न योगात् तदेतदस्मिन् रसवेदकर्म्म ॥
एकैक वस्तु प्रसरत् प्रदेशं भूयां समा तिष्ठति सूक्ष्मरूपैः।
संकोच मागत्य घनी भवत् तद्देशे कनीयस्यपि याति पीन्त्वा ॥
स एष संकोच विकाश धर्मान्वयोऽस्ति सर्वत्र वितान वेदात् ।
सर्वो वितानं भजतेऽथ नो चेद्वितान मायाति तदेष नास्ति ॥
एकं क्वचिद्वस्तु समीप दृष्टं बृहत् प्रतीमः क्रम विप्र कर्ष...
ह्रस्वं तं ह्रस्वं च भवत् तदन्ते न दृश्यते छान्दस वेद...त्

दृष्टिर्नृणां चान्द्र धरातलान्ता नातः परं गच्छति तेन तत्र ।
निधार्यते या दृगिदं   स्व वृत्तं तत्रैव दृश्यन्त इमानि भानि ॥
चान्द्रस्य षष्टि त्रिशती विभागान् धरातलस्य प्रतिपद्य तत्र ।
नक्षत्र तारा ग्रह भुक्ति भागान् व्यासांश्च तेषां गणयन्त्यभिज्ञाः ॥
पारेन लक्षान्त रितेऽस्ति चन्द्र श्चन्द्रप्रदेशान्त मुपैति दृष्टिः ।
धरातलं कल्पित मे तदक्षणे त्याहुर्नवीना गणित प्रवीणाः ॥
नृमस्तु यत्रैवत वास्ति चक्षुस्तत्रैव क्लृप्तं तु धरातलं तत् ।
चक्षुः प्रदेशेऽस्ति यथा यथर्चः प्रज्ञा प्रगृह्णाति तथार्तमर्थम् ॥
दूहान्तिके वस्तु युगान्तरं यत् तदप्युपेत्यक्षिण तज्ज्ञ सेक्षे ।
दूर स्थितानां तु मिथोऽन्तराणि समान दृङ् न्यायत उद्धृतानि ॥

वैषम्य साम्ये अपि वृद्धि ह्रस्वते यत्रोपतिष्ठन्त इमाः समन्ततः ।
व्याप्ताहि वाचः कथिता भवन्ति ते वेदाश्च्यवन्ते न हि नाभिबंधनात् ॥
साम्नामृचा मायतनं निरूढं पश्यामध्यानायतनं यजुस्तत् ।
वाचो हि सत्यान विना तु तेस्युः प्राणैर्नवाते मनसा विनास्युः ॥
प्राणांहि वेदा, मन स्तु वेदा, वाचो हि वेदा, इति चा विरुद्धम् ।
यावन्मनस्ता वदि मे प्रथन्ते प्राणाश्च वाचश्च सहैक भूताः ॥

यावान मीषा मवकाश आहित स्तत्र स्थिता दृक् स्वसमान वर्तिनी ।
वोपलभेत नेदृता
अदृङ् मूर्ति मेषा ... लभते, एदेतां, तस्मादिमां वेद इति प्रचक्षते ॥
अस्तीति यत्राह तदाह वेद त्रयीमिमा मेन तु सैव सास्ति ।
न चोपलब्धिं व्यतिरिच्य सत्ता नवोपलब्धिर्व्यति रिच्य सत्ताम् ॥

यन्नास्ति तन्नोपलभेय देवोपलभ्यतेऽस्तीद मतस्तदेकम्।
त्रय्यां हि भूतान्यखिलानि वीक्ष्ये त्रयीत एवोदभवत् समग्रम्॥
प्रजापतेरेव समग्रवेदा भवन्ति तस्याश्वसितानि वातें।
प्रजापतिर्न व्यतिरिच्य वेदान् प्रजापतिर्वेद इति ब्रवीमि॥
छन्दस्य वेदानृच आहुरेवं विज्ञानवेदान् प्रवदन्ति साम।
यजुस्तु सर्वो रसवेद इत्थं वेदेषु वेदान् घटयन्ति केचित्॥
छन्दांसि चैतान्यथ तान् वितानान् रसांस्तथा तान् प्रतिवस्तु विद्यात्।
अपौरुषेयाः पुरुष प्रयत्ना योग्यास्तु ते सर्वविधा हि वेदाः॥
ये पौरुषेया रचिताः पदार्थाः प्रजापतिस्तत्र च तत्र चायम्।
वेदैश्च यज्ञैश्च कृत स्वरूपः स्वयं विभुत्वादिव संनिधत्ते॥
वेदान् प्रपश्यद्भिरिमान् स्वबुद्ध्या वेदानुसारादुपपन्नमर्थम्।
ज्ञेयं विधेयं च निदर्शितुं यच्छास्त्रं कृतं तत्र च वेदशब्दः॥
ये प्राणदेवा अपि ये नृदेवा विज्ञानमेषामितिहास एषाम्।
यत्र स्तवो यत्र विधिश्च क्लृप्त स्तद्ब्राह्मणं वाक्यमपि वेदशास्त्रम्॥

प्रजापतिस्वरूपम्

एभिस्तु वाक्प्राणमनोभिराद्यैः सत्यैस्त्रिधातुः प्रथते ऽत्रगोऽर्थः।
तमक्षरं सक्षरमाहुराद्यामर्त्यं क्षरं स्यादमृतं ततोऽन्यत्॥
क्षराक्षराभ्यां सहितोऽव्ययोऽयं त्रिपूरुषो यः पुरुषः प्रतीतः।
प्रजापतिं तं ब्रुवते स चासावणोरणीयान्महतो महांश्च॥
अव्याकृतः कोऽपि परात्परो यः प्रागास सर्वप्रकृतिर्ह्यसीमः।
स एष वाक्प्राणमनोभिरेभिर्नानाविधैर्व्याक्रियतेऽव्ययात्मा॥

जयन्ति वेदाः परितः प्रजापतेः प्रजापतावेव पुनः प्रतिष्ठिताः। विना च वेदैर्न भवेत् प्रजापतिः प्रजापतिं वेदमयं ततो विदुः।
प्रजापतिः स द्विविधोऽनुगम्यते परात्परोऽसौ प्रथमः परोऽरजाः। भोक्ता परः स द्विविधो ऽत्र सत्यो यज्ञश्च सत्यस्तु स वेदमूर्तिः॥
यतो द्विधास्तीश्वरजीवभेदस्ततो जीवो द्विधायं सजडः सचेतनः। प्रजापतिः सर्वविधस्त्रिधातुको ऽनेमः पशुप्राणभृताऽऽत्मना कृतः

ओमुच्यते यो ध्वनिरत्र सा वाक् प्राणः स्वरो यत् प्रतिपद्यतेऽस्मात् ।
अर्थप्रतीत्यै पठितं मनस्तत् प्रजापतिः स प्रणवस्त्रिधातुः ॥
प्रजापतिर्ब्रह्म तु रूपमस्यानिरुक्तमन्यच्च निरुक्तमन्यत् ।
पूर्वानिरुक्तस्य निरुक्तिरग्रे विधीयते तद्द्वयमस्त्यभिन्नम् ॥
दिग्देशकालादिपरिग्रहस्तु प्रजापतेरस्य निरुक्तिताऽस्ति ।
तैश्चापरिच्छित्तिरिहानुरुक्तेः सोऽखण्डनिर्धर्मकनिष्कलोऽर्थः ॥
प्रस्तूयते यत्र हि वस्तु सत्तामात्रेण किन्तु स्वगतो न भेदः ।
विवक्ष्यते नापि च तत्र संख्या द्वित्वादिका स्यादनिरुक्तमेतत् ॥
निरुक्तिरेषा यदि चेदनेके भेदा भवन्तीह निरूप्यमाणाः ।
स्याद्धर्मधर्मित्वविवेचनाऽस्मिन् विज्ञायते तद्धि निरूप्यते च ॥
यत्किञ्च पश्याम्यखिलं तदेतन्निरुक्तरूपं सहभेदसंख्यम् ।
एतस्य मूलं त्वनिरुक्तरूपं ब्रह्मास्ति तन्नेह विशिष्य विज्ञः ॥
निरुक्तरूपं यदिहास्ति तस्मिन्नैकात्म्यमेषां कथितं त्रयाणाम् ।
निरुक्त एषोऽस्ति पुनस्त्रिपर्वा प्राणेन, वाचा, मनसा च रूपात् ॥
नाभिश्च मूर्तिर्महिमा प्रजापतेस्त्रीण्यस्य पर्वाणि भवन्ति रूपतः ।
नभ्यं मनो मूर्तिरियं तु वाङ्मयी प्राणात् समन्तान्महिमाऽनुवर्तते ॥
प्रजापतिर्यद्यपि सोऽयमेकस्तथापि पर्वानुगमात् त्रयः स्युः ।
प्रजापतीनां प्रथमोऽत्र नभ्योऽन्यो व्याकृतोऽन्यः पुनरत्र सर्वः ॥
नाम्ना च रूपेण च कर्मणा च स्युर्व्याकृता धर्मिणि यत्र धर्माः ।
तद्व्याकृतं रूपमिदं तु मूर्तं तस्यैव नाभावयमस्ति नभ्यः ॥
तद्ब्रह्म सामोक्थविधं हि नभ्यं सर्वेऽपि तद्व्याकृतवस्तु धर्माः ।
तदुत्थितास्तेन भृताः समानं तदस्ति तेषां विविधाकृतीनाम् ॥

" प्रजापतिश्चरति गर्भेऽन्तर जायमानो बहुधा विजायते ।

तस्य योनिं परि पश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥" यजु: ३१।१९

मूर्तिस्त्वियं व्याकृतिमस्ति रूपं गावश्च मूर्तिं परितश्चरन्ति ।

वेदाश्च यज्ञाश्च रसाश्च देवाः सहोप जीवन्ति हिता इमा गाः ॥

यद्वस्तुनः किञ्चन रूपमीक्षे तां गाव एवोपनमन्ति मेऽक्षिणि ।

गावश्च भानोः किरणा इहेताः काक्षीवतस्ताः शश्वदत्र वीते ॥

* " प्रजापतिर्मह्य मेता रराणो विश्वैर्देवैः पितृभिः संविदानः ।

शिवाः सती रुपनो गोष्ठमाकस्तासां वयं प्रजया सं सदेम ॥" ऋ० १०।१६९

वेदाश्च यज्ञाश्च समन्ततोऽस्या मूर्तेः परं मण्डलमर्जयन्ति ।

सोऽस्या हि मूर्तेर्महिमा निरुक्तः सर्वोऽयमुक्तो महिमा स एव ॥

एकः स धर्मोऽयमिमेऽत्र धर्मा धर्मा हि सर्वेऽत्र ततः स सर्वः ।

तमेव सर्वं महिमानमस्तौत् प्रजापतिः कोऽपि हिरण्यगर्भः ॥

" प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ।

यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥" ऋ० १-१२९

वेदाश्च यज्ञा अपि सर्वदेवाः प्रजापतेः सर्वविधस्य रूपम् ।

प्रजापतिस्त्वं त्वखिलस्य विश्वा द्विश्वस्य वाक्प्राणमनोमयत्वम् ॥

मनः प्रधानं भवतीह नाम्नो मूर्तिस्तु वाचा क्रियते विशेषात् ।

अन्तर्बहिः प्राणकृता सु गावो रसाश्च देवाश्च यदाश्रिताः स्युः ॥

अत्राहुरेके क्रम सृष्टिमेषां प्रजापतिर्वा इदमग्र आसीत् ।

सृष्ट्वा मनोऽसौ मन एव चासीत् सृष्ट्वाऽथ वाचं स च वाग्बभूव ॥

---

* प्रजापतिर्विधाता मह्यमेता गाः प्रयच्छन्, सर्वैर्देवैः पितृभिश्चैकमत्यं गतः सन् कल्याणी भवन्तीस्ता गाः अस्माकं [illegible] उपकरोतु । तासां गवां प्रजया संतानेन वयं संगच्छेमहीति सायणभाष्यम् ॥ ८।८।२७॥ प्रजापतिः प्रति वस्तु गत स्त[illegible] स्तुन आत्मा स सौर प्राणो चान्द्र प्राणो अप सं प्रजायमानः किरण प्रति फलनेन नाम इव सौर चान्द्र किरणरूपा गा सार्द्धं सुरूपतामा याताः प्रापयति । गोष्ठं [illegible] । गवां [illegible] सु रूपाणि । सं सदनं [illegible] । इति व्याख्या । विश्वै देवैः सूर्यस्तैः पितृभि- श्चन्द्रस्तैः संविदानः [illegible] प्रजापतिः प्रति वस्तु [illegible] [illegible] शिवा इव [illegible] सती रेता गाः [illegible] [illegible] प्रदेश [illegible] । [illegible] प्रदेशाः प्रति फलिताः एते किरणा [illegible] [illegible] [illegible] [illegible] । [illegible] प्रति फलित किरणो [illegible] [illegible] इति [illegible] ।

आदि प्रजापतिः

प्रजापतिः कश्चिदनन्त आस्ते प्रजापतीनां सहयोनिरेकः ।
प्रजापतीनां पुनरेक एकः प्रजापतीनां भवतीह योनिः ॥

मन्वायमेषां प्रथमः प्रजापतिर्ये चास्य भेदाः प्रतिपादितास्त्रयः ।
प्राणो बलं तत्र मनो रसं विदुर्वाचं तथाभ्वं तदिति त्रयं जगत् ॥

प्राणो बलं तत्र मनोरसः स्याद् वागभ्वमेतानि परात्पराणि ।
रसं तमाभुं प्रवदन्ति तुच्छं बलं तथाभ्वं च वदन्ति मायाम् ॥

एषां त्रयाणामिह चोत्तरोत्तरि क्रमोस्ति पूर्वं रसतो बलं भवेत् ।
बलान्यनन्तानि परस्परेण यं संसर्गमायान्ति तदभ्व मुच्यते ॥

सदप्रवर्त्यावपनं रसं तं भूमानमाकाशमनन्त माहुः ।
अक्षुब्ध रूपं न विमीयते तद् दिग्देशकालैरपि संख्ययापि ॥

बलान्यपूर्वाणि रसाद् भवन्ति क्षिणोति किन्त्वेष रसो न तेन ।
आश्चर्यवच्छान्त रसादशान्तं बलं समुद्भूय विलीयतेऽस्मिन् ॥

अथाणिमानो बहवः स्युरस्मिन् भूमन्यमुष्माद्बलतः प्रपन्नाः ।
उदेति तस्मात्तु बलं रसेनाणिम्नाऽत्मना तेन समन्वयात्सत् ॥

असद् बलं किन्तु सतो रसस्य प्रयोगतः सत्प्रति पद्यते तत् ।
सतो बलस्य प्रतिपत्तुमर्हं नास्ति स्वरूपं यदस्पृष्टमाद्यम् ॥

बले सतीदं बलमेति सच्चेदणिम्नि कुत्रापि यदैक्यमेति ।
द्वयोर्बहूनामपि चैकभावात् संसृष्टमभ्वं तदुदेति रूपम् ॥

भूताणु यत्रास्ति न तत्र बिन्दौ भूताणु किञ्चित् प्रविशेत् कदाचित् ।
बलानि भूयांस्यपि किन्तु सत्रा संसर्गमायान्ति तदेकबिन्दौ ॥

संसर्गभेदा अपि सन्त्यनेके, भेदो बहुत्वं च कुतोऽप्यपैति ।
यदैक्यमायान्ति बलानि तत्र द्वयोर्निपातेन भवेत्तदभ्वम् ॥

रसं च भूयांसि बलानि सत्रा गृह्णाति यत्पश्यति कंचिदर्थम्।

रसात्तदेकत्वमुदेति तस्मिन् बलस्वभावात्परिवर्तनानि ॥

तात्कालिकं भूरि बलाभिमर्द्दजं लोर्कत्रयातीतमदोऽत्र मत्रयत्।

न दृश्यते यद्दृश्यमत्र दृश्यते न दृश्यते क्वापि तदस्त्यलौकिकम् ॥

संतित्तिरेः प्राह सं याज्ञवल्क्यो यन्नाम यत्कर्म च यच्च रूपम्।

त्रयं तदभ्वं तदिदं त्रिलोक्या बाह्यादुपेत्यत्र परात्म सृष्टम् ॥

यौगिकरूढस्थित्यो यज्ञस्कन्धः

अत्राशनायोदयतेऽमितत्वादहर्निशं कामयते स भूम्ने।

तपांस्तपः श्राम्यति चैक एकः कर्मत्वशेषा नितरान् पुरेस्वे ॥

मनो वशादिच्छति तप्यतीह प्राणानुसारेण करोति यत्नम्।

श्राम्यत्ययं वाचि पुरं शरीरं युङ्क्ते च सोऽयं पुरुषस्वभावः ॥

तत्रांशनाया वशतोऽर्क उक्था दुत्थाय यच्चाहरतेऽशितिं स्वाम्।

तदन्नमूर्क्प्राण इतो मनः स्यात् पुरञ्जनेऽस्मिन् क्रम एष यज्ञः ॥

वाचो विकाराः प्रतियज्ञमन्ये भवन्ति, तैस्तैः सह वाग्विकारैः।

पुरञ्जनो यज्ञमयः कुलायः पृथग्विधो भाति स योगरूढः ॥

आदौ स्वयंभू—परमेष्ठि-सूर्याः सचन्द्र पृथ्वीत्यभवन् कुलायाः।

प्रत्येकमेते परतश्च भुक्ताः परांश्च भुञ्जन्ति निसर्ग एषः ॥